# 2022

## SANSKRIT — GENERAL

### Paper : SEC-A-1

### Full Marks : 80

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

1. (a) अधस्तनेषु ***द्वयोः*** संस्कृतभाषया देवनागरीलिप्या च अनुवादः कार्यः। 10×2

(i) The Mahābhārata is one of the two world famous Indian epics, which occupies the next place to the Rāmāyaṇa. The Rāmāyaṇa and the Mahābhārata are recognised as Itihāsa also in Sanskrit literature. The Rāmāyaṇa has been recognised as the Ādikāvya in the literary tradition of this country. This is clear from a statement of Ānandavardhana.

(ii) There lived in Ujjayinī a king named Tārāpīḍa. He conquered the earth by dint of his power. He had a queen named Vilāsavatī who was the chief of the ladies of the royal harem. They had no child. One day the king went to the apartment of Vilāsavatī and found her weeping.

(iii) After birth Śakuntalā was left in a dense forest by her mother. The great sage Kaṇva found her there. Out of affection he took her to his hermitage. There were two other hermit girls, Anasūyā and Priyaṃvadā in the same hermitage. These three girls played on the bank of Mālinī with deer, peacocks etc.

(b) अधस्तनेषु ***द्वयोः*** मातृभाषया अनुवादः कार्यः। 10×2

(i) अद्य प्रातः शय्यायाः उत्थाय अहं भ्रमणाय सरोवरं निकषा उद्यानं गतवान्। तदा सूर्यः उदितः, तृणोपरि शिशिरबिन्दवश्च शोभन्ते स्म। मन्दं वाति स्म पवनः, विहगाश्च अकूजन् सुमधुरम्। कियत्क्षणं तद्देशे इतस्ततः भ्रमित्वा शीतलेन समीरणस्पर्शेन अहम् अतीव सुखम् अनुभवामि स्म।

(ii) कश्चित् ग्रामे सस्त्रीकः ब्राह्मणः एकस्मिन् कुटीरे वसति स्म। ब्राह्मणस्य पत्नी अतीव कलहप्रिया आसीत्। तस्याः कलहभयात् वायसोऽपि तस्य गृहे न उपविशति स्म। तस्याः कलहज्वालाम् असहमानः स ब्राह्मणः एकदा गृहं परित्यज्य वनं समायातः। वने कस्यचित् वृक्षस्य अधः उपविष्टः स ब्राह्मणः रौति स्म। तदा वृक्षात् कश्चित् भूतः तम् अवदत्– "मा रोदीः।"

(iii) ग्रन्थाः अस्माकं प्रकृतबान्धवाः। संसारे बन्धुः अस्मान् परित्यक्तुं समर्थः, ग्रन्थास्तु अस्माभिः सह चिरं तिष्ठन्ति। धार्मिकः समाजस्य भूषणम्। कदापि सः अन्येषां न अनिष्टं करोति। अपि तु स्वार्थं विहाय स अपरेषां उपकाराय यतते। वृक्षाः प्रचण्डे आतपे परोपकाराय छायां यच्छन्ति। एषा प्रकृतिः सज्जनानाम्।

2. कञ्चन **एकतरम्** अनुच्छेदं पठित्वा तदन्ते प्रदत्तानां प्रश्नानाम् उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्।

(a) अस्ति कस्मिंश्चित् वनदेशे बहुवकसनाथो वटपादपः। तस्य कोटरे कृष्णसर्पः प्रतिवसति स्म। स च वकबालकान् अजातपक्षानपि सदैव भक्षयन् कालं नयति। अथैको वको भक्षितशिशुवैराग्यात् सरसस्तीरमासाद्य वाष्पपूरितनयनोऽधोमुखस्तिष्ठति। तं च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच– कथं रुद्यते भवताद्य?

(i) कीदृशः वटपादपः वनदेशे आसीत्?

(ii) वटपादपस्य कोटरे कः वसति?

(iii) कृष्णसर्पः केन प्रकारेण कालं नयति?

(iv) वकः कस्याम् अवस्थायां कुत्र वसति स्म?

(v) कुलीरकः किम् उक्तवान्?

2+1+3+2+2

(b) नीलेन्दुः प्रत्यहं प्रातः चतुर्वादने उत्तिष्ठति। आबाल्यात् तस्य अयम् अभ्यासः। प्रातः उत्थाय स हस्तपादौ प्रक्षालयति। शीतकाले अपि स शीतलेन जलेन मुखं प्रक्षालयति। प्रत्यहं प्रातः उत्थाय एकं लगुडं हस्ते धृत्वा रेलयाननिवृत्तिस्थलं गच्छति। ततः संवादपत्राणि स्वीकृत्य गृहेषु वितरति। कदाचित् शुनकाः तस्य पृष्ठतः अधावन्। अतः स हस्ते लगुडं धरति। तस्य गृहे माता, पिता भगिनी च विद्यन्ते।

(i) नीलेन्दुः कस्मिन् समये उत्तिष्ठति?

(ii) स कुतः संवादपत्राणि स्वीकरोति?

(iii) स हस्ते लगुडं किमर्थं धरति?

(iv) नीलेन्दुः संवादपत्राणि स्वीकृत्य कुत्र वितरति?

(v) तस्य गृहे के विद्यन्ते?

2+2+2+1+3

3. अधोलिखितयोः विषय**मेकमव**लम्ब्य यथानिर्देशं पत्रं विरच्यतां संस्कृतभाषया देवनागरीलिप्या च। 10×1

(a) परिवेशसंरक्षणमधिकृत्य मित्रं प्रति पत्रमेकं लिख्यताम्।

(b) महाविद्यालये अनुपस्थितेः कारणमुल्लिख्य तन्मार्जनार्थम् अध्यक्ष्यं प्रति पत्रमेकं लिख्यताम्।

4. अधोलिखितेषु विषय**मेकम**वलम्ब्य न्यूनतया पञ्चाशदधिकाष्टशतशब्दैः संस्कृतभाषया देवनागरीलिप्या च प्रबन्धः विरच्यताम्।

20×1

(a) रम्या रामायणी कथा।

(b) विद्वान् सर्वत्र पूज्यते।

(c) तव प्रियः कविः।